**Kalika Prabha : Journal of Multidisciplinary Studies**
[ISSN:- 3021-9388 (Print)]
Published by Kalika Sanskrit Vidyapeeth (RMC) Nawalpur, Nepal
https//www.ksv.edu.np

# व्याकरणशास्त्रे धात्वर्थान्वेषणम्

**योगराजकण्डेलः**

*उपप्राध्यापकः, ने.सं.वि., शारदाविद्यापीठम्*

***Article History :*** *Received : 19th, Jan. 2026; Reviewed: 25th, March 2026 Accepted: 21st; June, 2026*
***Corresponding Author*** *: Yogaraj Kandel* ***E-mail :*** *yograj.kandel@nsu.edu.np*
***DOI :*** *https://doi.org/10.3126/kp.v4i1.97050* ***ORCID****: https://orcid.org/0009-0006-6907-3197*

## लेखसारः

अत्रानुसन्धानात्मके पत्रे वैयाकरणभूषणसारग्रन्थानुसारेण धात्वर्थनिरूपणम् एवं शेखरमनोरमादिग्रन्थदिशा धातुसंज्ञाविधायकस्य भूवादयो धातवः इति सूत्रस्य च व्याख्यानं विहितमस्ति। फलव्यापारयोः धातूनां शक्तीति शाब्दिकानां राद्धान्तो वर्तते। फलापेक्षया व्यापारस्य शाब्दबोधे कर्तरि कर्मणि च उभयत्र प्राधान्यमिति प्राचीनवैयाकरणानामभिमतम्। नव्यमते तु 'सुपः आत्मनः क्यच्' इति सूत्रस्थभाष्यद्वारा ज्ञायते कर्तृप्रत्ययस्थले धात्वर्थव्यापारस्य, कर्मप्रत्ययस्थले च फलस्य प्राधान्यमिति निश्चीयते। मीमांसकानां मते तु फलं धात्वर्थः व्यापारस्तु आख्यातस्य अर्थ इति तथा च व्यापारमुख्यशाब्दबोध इति तेषामभिमतम्। केचन मीमांसकाश्च भवना आख्यातार्थः, शब्दीभावना च लिङर्थः व्यापारो धात्वर्थ इति। तथा च गुरुमतेऽपि भावना आख्यातार्थ एव, भावना मुख्यविशेष्यकशाब्दबोधो भवतीति तेषामभिप्रायः। तार्किकास्तु फलव्यापारयोर्धात्वर्थत्वं मन्यन्ते। कृतिश्चाख्यातस्यार्थः, शाब्दबोधस्तु प्रथमान्तार्थमुख्यविशेष्यको भवति, तथा सति कर्तृप्रत्ययस्थले कर्तरि कर्मप्रत्ययस्थले च कर्मणि बोध्यः। एतत् सर्वं पर्यालोचनं विधाय धातुसंज्ञाविधायकस्य सूत्रस्यापि सामान्यार्थनिरूपणपूर्वकं विशेषार्थस्य निर्वचनमत्र विहितं विद्यते। षड्विधेषु सूत्रेषु एतत्संज्ञाविधायकं सूत्रमस्ति। द्विपदात्मकस्यास्य सूत्रस्य सामान्यार्थो भवति क्रियावचित्वे सति भ्वादिगणपठितानुपूर्वीसदृशानुपूर्वीमन्तः धातुसंज्ञकाः स्यु इति, तेन भ्वादिगणे पठिताः भूप्रभृतयो वासदृशाः ये सन्ति तेषां धातुत्वमनेन विधीयते। सादृश्यञ्चात्र प्रतियोगितावच्छेदकव्यापकीभूतधर्मेण गृह्यते इति। तथा सति धात्वर्थस्य परिचयः, फलव्यापारयोः निरूपणम्, धात्वर्थविषयकानां मीमांसक–नैयायिकमतानां पर्यालोचनम्, धातुसंज्ञाविधायकसूत्रस्यार्थनिरूपणं तथैव वैयाकरणभूषणसार–परमलघुमञ्जूषादिग्रन्थे, मनोरमाशेखरादिग्रन्थे च धात्वर्थविषये विद्यमानस्य भेदस्य तुलनात्मकं समीक्षणमत्र विहितमस्ति।

**कूटशब्दाः** अन्योन्याश्रयदोषः, आह्लादकत्वा, प्रतियोगितावच्छेदक, सहविवक्षा, सादृश्यम्

## विषयपरिचयः

व्याकरणं नाम शब्दानुशासनशास्त्रम्, व्याकरणेन प्रकृतिप्रत्ययविभागद्वारा असाधुशब्देभ्यो विविच्य साधुशब्दा अनुशिष्यन्ते – अन्वाख्यायन्ते। अतः महाभाष्यकारेण अथ शब्दानुशानमिति वदता तस्य शब्दानुशासनं मुख्यं प्रयोजनं प्रतिपादि। व्याकरणाध्ययनस्य प्रयोजनप्रयोजनानि तु 'रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति'। वेदानां रक्षार्थमध्येयं व्याकरणम् (त्रिपाठी, २०७३, पृ. २१)। पचाङ्गं व्याकरणमिति प्रसिद्धमस्ति। संस्कृतभाषायां वेदाः एव षडङ्गेषु विभक्ताः सन्ति अन्यानि चोपब्धानि शास्त्राणि प्रायेण पञ्चाङ्गेषु विभक्तानि विद्यन्ते। शब्दशास्त्रनिकाये व्याकरणस्य कात्स्न्र्यद्योतनार्थं पञ्चाङ्गव्याकरणमिति शब्दो सर्वदा प्रयुज्यते। तथा च प्रबन्धचिन्तामणिनामके ग्रन्थे हेमचन्द्राचार्यैः श्रीसिद्धहेमाभिधानाभिधं पञ्चाङ्गमपि व्याकरणं सपादलक्षणपरिमाणं संवत्सरेण रचयाञ्चक्रे (शास्त्री, २०५५, पृ. २६४)। शब्दशास्त्रस्य चेमानि विद्यन्ते पञ्चाङ्गानि– शब्दानुशासनम्, धातुपाठः, गणपाठः, उणादिपाठः, लिङ्गानुशासनञ्च। एतेषु पञ्चस्वङ्गेषु शब्दानुशासनं मुख्यं विद्यते अन्यानि च शब्दानुशासनोपकारकत्वाद् गौणानि। धातुपाठादीन्यङ्गानि च शब्दानुशासनस्य खिल इति संज्ञया व्यवह्रियन्ते। एवमेव शाब्दिकानां नये शब्दास्तावद् धातुजाऽधातुजनामजभेदात् त्रिविधाः भवन्ति। तत्र च धातुजशब्दा अपि द्विविधाः पचति–पठतिप्रभृतयः क्रियावाचकाः शब्दाः, पाठक–पाचकादयो नाम शब्दाश्च। वृक्षादिनामोपसर्गनिपाताव्ययशब्दाः अधातुजाः अर्थात् रूढाः मन्यन्ते। तद्धितप्रत्ययान्ताः शब्दाः नामजा भवन्ति। समासवृत्तिद्वारा निष्पन्नाः शब्दाश्च उक्तानां त्रिविधानां समुदायरूपा एव भवन्तीति तेन तेषां पृथक् गणना नैव विधीयते। शब्दशास्त्रे धातुशब्दस्य लक्षणमेवं विधीयते – 'दधाति विविधं शब्दरूपं यः स धातुः'। नानाविधशब्दरूपाणां धारणकर्ता यो मूलशब्दः स एव धातुरित्यभिधीयते। यश्च आवश्यकतां परिभाव्य कदाचिन्नामविभक्तियुक्तो भूत्वा नाम सम्पद्यते, आख्यातविभक्तियुक्तो भूत्वा च क्रयां सम्पद्यते, तथा चोभयविभक्तिविवर्जितः सन् स्वार्थमात्रं द्योतयेत् सः त्रिषु रूपेषु परिवर्तनशीलो मूलशब्द एव धातरिति निगद्यते। पूर्वं तावत्संस्कृतचिन्तनपरम्परायां सर्वेऽपि शब्दाः धातुजा एव मन्यन्ते स्म। यस्मिन् काले शब्दानां भूयानंशः रूढः स्वीकृतः तस्मिन्नपि काले नैरुक्ताः वैयाकरणेषु शाकटायनश्च नामशब्दानाख्यातजानेव स्वीकुर्वन्ति स्म (शास्त्री, २०५५, पृ. २६७)। तेनैव तत्कालिकैर्वैयाकरणैः रूढपदेन स्वीकृतानां वृक्षादिशब्दानां यौगिकं पक्षं प्रदर्शयितुमुणादिपाठस्थखिलरूपेण प्रवचनं विहितम्। अत एव सर्वेषां शब्दानां धातुयोनित्वमामनन्ति शब्दतत्त्ववेत्तारः। निखिलशब्दव्युत्पादने च धातुरेव मूलाधारो वर्तते। लोके यद्यपि सामान्यतया प्रकृतिप्रत्ययसमुदितस्य गच्छति, पचति इत्यादिवाक्यानामेव व्यवहारो भवति तत एवार्थबोधश्च जायते, तथापि कियान्नर्थः प्रकृतेः, कियाँश्च प्रत्ययस्येति निर्णयाय धात्वर्थज्ञानं सर्वदा अपेक्षितं भवति। एतत्सर्वं विचार्य धात्वर्थस्य परिचयः, फलव्यापारयोः निरूपणम्, मीमांसक–नैयायिकमतानां धातुसम्बन्धिमतपर्यालोचनम्, धातुसंज्ञाविधायकसूत्रस्यार्थनिरूपणञ्चात्र विहितमस्ति।

## अध्ययनविधिः

धात्वर्थ–धातुसंज्ञाविधायकसूत्रयोश्च समीक्षणात्मकेऽअध्ययनेऽत्र सामग्रीसङ्कलनाय पस्तकालयविधिः प्रयुक्तो वर्तते। पुस्तकालयस्य प्रयोगसन्दर्भे भौतिकरूपेण समुपलब्धानां तथैव अनलाइनमध्ये प्राप्तानां पुस्तकानामपि आवश्यकतां परिभाव्य सम्प्रयोग अत्र विहितः। विशेषरूपेण धात्वर्थविषयप्रतिपादकाः शब्दशास्त्रसम्बद्धाः तथा च दर्शनान्तरं विद्यमानाटीकाग्रन्थाश्च समग्रीरूपेण प्रयुक्ताः विद्यन्ते । तथैव विविधविषयविज्ञानां विदुषां व्याख्यानं श्रुत्वा, पठित्वा, परामर्शञ्च गृहीत्वा अस्य लेखस्य सामग्रीसङ्कलनं विहितमस्तीति।

**१. अध्ययनस्य क्षेत्रं सीमा च**

वैयाकरणभूषणसारग्रन्थमबलम्ब्य धात्वर्थनिरूपणम्, तथा च मनोरमाशेखरग्रन्थानुसारं धातुसंज्ञाविधायकसूत्रस्य परिष्कारः, एवं तत्सूत्रस्थक्रियापदपर्यालोचनञ्चात्र कृतमस्ति। तेन द्वावेवास्यनुसन्धानपत्रस्याध्ययनक्षेत्रे स्तः। एतत्भिन्ना अन्या च सीमा विद्यते।

**२. विषयनिरूपणम्**

शब्दशास्त्रपरम्परायां फलव्यापारौ धातुवाच्यौ स्तः। तत्र च फलव्यापारयोर्मध्ये फलजनकत्वात् व्यापारस्यैव प्राधान्यमिति। व्यापाराश्रयः कर्ता, फलाश्रयः कर्म च तिङर्थः इति। एतदेव निरूपयति कौण्डभट्टः वैयाकरणभूषणसारग्रन्थे –

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्राधानं व्यापारस्तिङर्थस्तु विशेषणम्॥ (मिश्रः, सन् २०१६, पृ. ७)

फलञ्च व्यापारश्चेति फलव्यापारौ तयोः फलव्यापारयोरिति। फलव्यापारयोरिति द्विवचननिर्देशेन फले, व्यापारे च धातूनां पृथक् शक्तिरिति सिद्ध्यति। तत्र च फलव्यापारयोरिति द्विवचननिर्देशेन फले, व्यापारे च धातोः पृथग् शक्तिरिति। अत्र तु न फलावच्छिन्नव्यापारे एका एव विशिष्टशक्तिरिति। विशिष्टशक्तिस्वीकारे पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन इति नियमस्य विद्यमानत्वाद् ओदनं पचति इत्यादौ ओदनस्य रामेण ओदनः पच्यते इत्यादौ व्यापारे च रामस्यान्वयो न स्यादिति। तेन एकवृन्तगतफलद्वयन्यायेन फले व्यापारे च धातूनां पृथक् शक्तिरित्युपपद्यते।

नागेशादयो नव्यवैयाकरणास्तु फलावच्छिन्ने व्यापारावच्छिन्ने च धातूनां शक्तिमस्तीति स्वीकुर्वन्ति। फले, व्यापारे च धातूनां पृथक् शक्तिस्वीकारे व्यापारोद्देश्यकफलविधेयकस्य फलोद्देश्यकव्यापारविधेयकस्य चाऽपत्तिः, उद्देश्यविधेयभावेनान्वयप्रयोजिकायाः पृथगुपस्थितेः सत्त्वादिति। विशिष्टवाचकत्वे तु पृथगुपस्थितेरसत्वान्न दोषः। फले व्यापारे च धातूनां पृथग् शक्तिस्वीकारे फलविशेषणकव्यापारबोधे कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितेः, व्यापारविशेषणकफलबोधे कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितेः कारणमिति कार्यकारणभावद्वयकल्पनम्, धातोर्बोधजनकत्वशक्तिद्वयकल्पनञ्चेत्यतिगौरवं तेन फलावच्छिन्नव्यापारे व्यापारावच्छिन्नफले च धातूनां शक्तिरिति। अत्र च फले व्यापारे च धातूनां खण्डशः शक्तिरिति कौण्डभट्टादिप्राचीनवैयाकरणामभिमतम्। उद्देश्यविधेयभावेनान्वयनियामकव्युत्पत्तौ धातुभिन्नत्वनिवेशेन दोषस्य वारणं भवति। व्यापारविशेष्यकबोधं प्रति

कर्तृप्रत्ययसमभिव्याहारश्च कारणमिति कार्यकारणभावद्वयकल्पनमपि नापेक्षितम्। एकवृन्तगतफलद्वयन्यायेन फलव्यापारयोरपि पर्य्यायेण विशेष्यत्वं विशेषणत्वञ्चोपपाद्यमिति।

मण्डनमिश्रादीनां मीमांसकानां मते तु फलं धात्वर्थः, व्यापारस्तु आख्यातस्यार्थो वर्तत इति स्वीकुर्वन्ति। तथा च व्यापारमुख्यशाब्दबोधश्च स्वीकृतः। अन्येऽपि मीमांसकाः भावनायाः आख्यातार्थत्वं स्वीकृत्य शाब्दीभावना लिङर्थः व्यापारो धात्वर्थ इति। गुरुमतेऽपि भावना आख्यातार्थ एवेति। तार्किकास्तु फलव्यापापरयोर्धात्वर्थत्वं स्वीकुर्वन्ति। कृतिश्चाख्यातस्यार्थ इति। शाब्दबोधश्च एतेषां मते प्रथमान्तार्थमुख्यविशेष्यको भवतीति तथा च कर्तृप्रत्ययस्थले कर्ता प्रथमान्तार्थो भवति, कर्मप्रत्ययस्थले तु कर्म प्रथमान्तार्थ इति। कालस्य च धात्वर्थव्यापारे भवति अन्वयः। तिङर्थसङ्ख्यायाश्च कर्तृप्रत्ययस्थले कर्तरि, कर्मप्रत्ययस्थले च कर्मणि भवति अन्वयः। शाब्दबोधकाले तु प्राचीनानां वैयाकरणानां मते कर्तृप्रत्ययस्थले कर्मप्रत्ययस्थले च एकविधः शाब्दबोधो भवति। यथा देवदत्तः ओदनं पचति इत्यत्र देवदत्तेन ओदनः पच्यते इति उभयत्र कर्तरि, कर्मणि च ओदानाभिन्नाश्रयनिष्ठविक्लित्यनुकूलो वर्तमानकालिक एकत्वविशिष्ट देवदत्ताभिन्नाश्रयवृर्तिव्यापारः इत्यात्मको भवति शाब्दबोधः। नवीनानां शाब्दिकानां मते तु कर्तृप्रत्ययस्थले एवमेव भवति शाब्दबोधः किन्तु कर्मप्रत्ययस्थले तु एकत्वविशिष्ट–देवदत्ताभिन्नाश्रयवृत्तिवर्तमानकालिकव्यापारजन्या तण्डुलाश्रयाभिन्ननिष्ठा विक्लित्तिरिति फलविशेष्यकशाब्दबोधो भवतीति।

तार्किकमते तु कृतिश्चाख्यातार्थ इति, तत्र च धात्वर्थव्यापारश्च विशेषणम्। कृतिः सङ्ख्या च प्रथमान्तपदलभ्येऽर्थेऽन्वेति। एवं सति देवदत्तः ओदनं पचति इत्यादौ ओदननिरूपिताधेयता-वद्विक्लित्यनुकूलव्यापारानुकूलकृतिमान् एकत्वविशिष्टश्चैत्रः इति (द्विवेदी, २०४२, पृ. १५)। देवदत्तेन ओदनः पच्यते इत्यादिकर्मप्रत्ययसमभिव्याहृतस्थले तु एकत्वविशिष्टकृतिमच्चैत्रनिष्ठव्यापार-जन्यविक्लित्याश्रयस्तण्डुलः इति एवं सति उभयत्र प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधो भवतीति। शाब्दिकेभ्यो एतन्मतद्वयमपि नैव रोचते।

तथा हि फलमात्रस्य धात्वर्थत्वे ग्रामः संयोगवानितिवत्, ग्रामो गमनवानित्यादापि स्यात् भावार्थकल्युटा धात्वर्थमात्राभिधायितया संयोगरूपफलस्य ग्रामे सत्त्वात् तादृशः प्रयोगः प्रसज्येत। व्यापारस्य धात्वर्थत्वे प्रकृत्यर्थतया प्रकृतिप्रत्ययौ सहार्थं ब्रूतः तयोः प्रत्ययार्थः प्रधानमिति न्यायेन व्यापारमुख्यविशेष्यकशाब्दबोधो नैव भवेदिति तेन व्यापारो न धात्वर्थः इति तेषामाशयो विद्यते। तन्नैव समीचीनमिति। यतो हि प्रधानप्रत्ययार्थवचनमशिष्यमित्युक्त्वा सूत्रकारेणैव समाधानं विहितं तथैव प्रत्ययार्थतया कस्यचित् प्राधान्यमिति नियमो नैवादरणीयः, प्राधान्याप्राधान्यबोधस्तु व्युत्पत्त्यनुरोधेन भवतीति। तथैव 'भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि' इति न्यायाच्च धात्वर्थव्यापारस्यैव प्राधान्यमध्यवसीयते। तथा च फलमात्रस्य धात्वर्थत्वे क्रियावाचित्वाभावेन भूवादयो धातवः इति सूत्रेण धातुसंज्ञापि नैव भवति। तेन च सूत्रेण क्रियावचित्वे सति भ्वादिगणपठितानुपूर्वीसदृशानुपूर्वीमन्तः ये सन्ति तेषामेव धातुसंज्ञा विधीयते (पाण्डेयः, सन् २०१३, पृ. १३९)। नात्र सूत्रे क्रियापदेन फलस्यग्रहणं भवतीति तेन फलरूपक्रियावाचित्वेन भवत्येव धातुसंज्ञा इति वक्तुं शक्यते। एवं सति धात्वर्थत्वं क्रियात्वं क्रियावाचित्वे सति भ्वादिगणपठितत्वं धातुत्वमिति,

क्रियात्वज्ञाने धातुत्वज्ञानस्य धातुत्वज्ञाने च क्रियात्वज्ञानस्यापेक्षिततया अन्योन्याश्रयदोषस्यापत्तिरिति। शाब्दिकानां नये तु साध्यत्वेन प्रतीयमानत्वस्य तल्लक्षणस्य वक्तुं शक्यतया दोषाभावाच्चेति।

तथा च तार्किकानां मते 'रथो गच्छति', 'तण्डुलः पच्यते स्वयमेव' इत्यादौ रथादावचेतने कृतेर्बाधाल्लक्षणावृत्त्या आश्रयस्य बोधो भवति। एवमेव कृतेरनुक्तत्वाच्च तृतीयाविभक्तेर्दुर्वारत्वमिति। एवमेव नैयायिकाभिमतः प्रथमान्तार्थमुख्यशाब्दबोधोऽपि नैव युक्तियुक्तो वर्तते। मृगस्य उत्कटधावनक्रियां दिदर्शयिषुः कश्चित् पश्य मृगो धावति इति वदति। अत्र च वाक्ये नैयायिकमते कृतिमन्मृगस्य प्रधानवाक्यार्थत्वेन प्रतीयमानस्य दर्शनकर्मतयाऽन्वये शतृप्रत्ययापत्तेः तथा सति द्वितीयायाः आपत्तेश्च। नात्र तमिति पदमध्याहृत्य दोष परिहारो भवति, वाक्यभेदेन भाष्यसिद्धैकवाक्यताया भङ्गापत्तिरिति।

## फलम्

यद्यपि लोके यदुद्देश्येन धात्वर्थक्रियायां प्रवृत्तिस्तत्फलमिति सामान्यतया प्रसिद्धमस्ति। स्वरितञितः इति सूत्रस्य भाष्येऽपि एतदेवाभिहितम्। वाक्यपदीयकरोऽपि एतदेव कथयति –

यस्यार्थस्य प्रसिद्ध्यर्थमारभन्ते पचादयः।
तत्प्रधानं फलं तेषां न लाभादिप्रयोजनम्॥

अर्थात् यस्य प्रयोजनस्य सिद्ध्यर्थं पाक क्रियाया आरम्भो विधीयते तदेव तस्या क्रियायाः प्रधानं फलमस्ति। यतो हि द्रव्यलाभादियागक्रियायाः फलं नैवास्ति यतो हि द्रव्यलाभार्थं यागक्रियायाः आरम्भो नैव विधीयते। यदि स्वर्गकामनायाः यागक्रिया विधीयते तर्हि यागक्रियाया फलं स्वर्ग इति। यथा क्षुधानिवृत्त्यर्थं पाकक्रिया क्रियते तेन क्षुधानिवृत्तिरेव पाकक्रियायाः फलमस्ति। तथा सति भोजनानन्तरं यावत्पर्यन्तं भोजनद्वारा क्षुधायाः निवृत्तिर्नैव जायते तदा पर्यन्तं अपाक्षिदिति रूपस्य सिद्धिर्नैव जायते। तेन यतादृशस्य फलस्याङ्गीकारे धातूनां सकर्मकत्वाकर्मकत्वव्यवहारयोश्चोच्छेदापत्तिरिति। तेनात्र फलपदेन पारिभाषिकफलपदार्थस्य ग्रहणं विधीयते। तेन वैयाकरणभूषणसारग्रन्थस्य मूल एव उक्तम् फलम् – विक्लित्त्यादीति। विक्लित्तिश्च रूपान्तरम्, अवयवसंयोगविशेषस्तद्विभागविशेषश्चेति। फलपदार्थस्य लक्षणन्तु तद्धात्वर्थजन्यत्वे सति तद्धातुजन्योपस्थितिविषयत्वं तद्धात्वर्थत्वं वेति। यथा पच् धात्वर्थव्यापारजन्या विक्लित्तिः, एवम् विक्लित्तौ पच्धातुजन्योपस्थितविषत्वमप्यस्ति तथैव पच्धात्वर्थत्वमपि वर्तते तेन विक्लित्तिः पच्धात्वर्थफलमस्ति।

## व्यापारः

व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया इति वैयाकरणभूषणसारग्रन्थे उक्तम् (मिश्रः, २०१६, पृ. १०)। भावना च साध्यरूपा क्रिया इति, मीमांसकै भावनापदेन यस्य प्रयोगो विधीयते स एव वैयाकरणनिकाये व्यापारपदार्थ इति। तेन साध्यत्वप्रकारकप्रतीतिविषयत्वं व्यापारत्वमिति सामान्येन वक्तुं शक्यते। वाक्यपदीयग्रन्थेऽपि

'यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्त्वात् सा क्रियेत्यभिधीयते'॥

अर्थात् आश्रितः – क्रमः – पौर्वापर्यं येन रूपेण तत् आश्रितक्रमम्, तद्रूपं यस्याः सा आश्रितक्रमरूपा, तस्य भावस्तत्त्वात् आश्रितक्रमरूपत्वात्। क्रिया रूपं हि – तदवयवा अधिश्रयणादयः, ते च क्रमश एवोत्पद्यन्ते। दर्पणग्रन्थे च अत्र कारिकायां विद्यमानं क्रमशब्दमर्श आद्यजन्तमाश्रित्य आश्रितं क्रमरूपं यस्यास्तत्त्वात् पूर्वापरीभूतावयवकादित्यर्थः। तदीयाऽवयवानामधिश्रयणाद्यधःश्रयणपर्यन्तानां क्रमेणोत्पत्तेः क्रियापदेन सा उच्यते। यत्र च न क्रमिकावयवी व्यापारास्तत्र रूढिरेवादरणीया, पौर्वापर्यारोपो वा। नन्वत्र साध्यरूपक्रियायां प्रतीतौ न किमपि प्रमाणमित्युच्यते चेत् पचति, पाकः इत्यत्र उभयत्र पच्धातुः, तथैव करोति, कृतिः इत्यत्र च कृधातुः। एवं सति तिङन्त–कृदन्तद्वयोस्थले धातुश्चैक एव तथा च धात्वर्थश्च समानमेव तथापि पाकः, कृतिरत्युच्यमाने वाक्यार्थबोधस्य कृते भवति, अभूदित्यादिक्रियान्तरस्य आकांक्षा जायते किन्तु पचति, भवति इत्यादौ तु क्रियान्तरस्य आकांक्षा नैव भवति तेन धातूनां सामनरूपेण प्रतीतावपि एकत्र क्रियान्तरस्य आकांक्षा, एकत्र च क्रियान्तरस्यानाकांक्षा एव साध्यक्रियायां मानमिति। साध्यत्वञ्च क्रियान्तराकांक्षानुत्थापकतावच्छेदकरूपवत्त्वमिति, अर्थात् यया क्रियया क्रियान्तरस्य आकांक्षायाः नैव भवति सा एव क्रिया साध्यक्रिया इति। साध्यरूपत्त्वस्य च असत्त्वभूतत्वमप्युच्यते। तेन वाक्यपदीयकारोऽपि वदति –

‘असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते’ (नेने, २०३७, पृ. १२)

अर्थाद् असत्त्वभूतक्रिया च तिङ्पदैरुच्यते, तथा च निरुक्तकारोऽपि एवमेव कथयति भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि (मिश्रः, २०१६, पृ. १२) अर्थाद् आख्याते (तिङन्ते) क्रियायाः प्राधान्यं भवति, नाम्नि च सत्त्वस्य प्राधान्यमिति निरुक्तकारवचनाद् क्रियायामर्थात्व्यापारस्यैव प्राधान्यं विद्यते। भूवादयो धातवः इति सूत्रस्य भाष्येऽपि धात्वर्थभावनाया एव प्राधान्यमुक्तम्। तत्र च महाभाष्ये का तर्हीयं वाचो युक्तिः ? पचति भवति, त्वं पचसि भवसि, पक्ष्यति भवतीति, सैषा वाचो युक्तिः – पचादि क्रिया भवति क्रियायाः कर्त्र्यो भवन्ति इति। तेन चाहत्यैव पचाद्यर्थक्रियाकर्तृकभवनक्रियाया प्राधान्यं प्रतिपाद्यते। (मिश्रः, २०१६, पृ. ११)

## सूत्रार्थनिरूपणम्

धातुसंज्ञा विधायकं सूत्रञ्च भूवादयो धातव इति। अत्र च सूत्रे द्वे पदे वर्तेते। षड्विधेषु सूत्रेषु एतत्संज्ञाविधायकं सूत्रमस्ति। तथा च भूश्च वाश्च इति भूवौ, आदिश्च आदिश्च इति आदी। भूवौ आदी येषां ते भूवादयः इति रीत्या इतरेतरयोगद्वन्द्वगर्भो बहुव्रीहिसमासः (पाण्डेयः, सन् २०१२, पृ. १३९)। प्रथमस्तावदादिशब्दः प्रभृतिवचनः/व्यवस्थावचनः। द्वितीयश्च प्रकारवचनः/सादृश्यवचनः। भूपदार्थस्य प्रभृतिवाचके आदिपदार्थे, वापदार्थस्य च प्रकारवाचके आदिपदार्थे अन्वयः। तथा च भूप्रभृतयो वासदृशाः ये ते धातुसंज्ञकाः भवन्ति इत्यर्थः।

ननु ‘भूवौ’ इत्यत्र द्वन्द्वसमासः न संभवति। समासे हि साथ्र्यमपेक्षितं भवति। सामर्थ्यञ्च समस्यमानपदार्थानां परस्परान्वयरूपमेव। तथा च यत्र च समस्यमानपदार्थानाम् ‘एकधर्मावच्छिन्नानां एकधर्मावच्छिन्नसंसर्गेण एकधर्मावच्छिन्नेऽन्वयो भवति तत्रैव समासोऽपेक्षितः’। अयमेवान्वयः सहविवक्षा इत्युच्यते वैयाकरणैः। यथा - ‘धवखदिरौ छिन्धि’ इत्यत्र समुदायविशिष्टयोः धवखदिरयोः कर्मत्वरूपैकधर्मावच्छिन्नसंसर्गेण छिदित्वावच्छिन्न-

छिदिक्रियायामन्वय इति द्वन्द्वः साधुः। सहविवक्षायाः द्वन्द्वप्रयोजकत्वादेव धवस्य छेदनान्वयविवक्षायां खदिरस्य दर्शनान्वयविवक्षायाञ्च न 'धवखदिरौ छिन्धि, पश्य' इति प्रयोगः। एवं 'कुठारेण धवं छिन्धि' इत्यभिप्रायेण धवकुठारौ छिन्धीति न प्रयोगः। 'धवं खदिरञ्च पश्य' इत्यभिप्रायेण न धवखदिरौ पश्येति प्रयोगः। प्रकृतेऽपि भूपदार्थस्य व्यवस्थार्थकादिपदार्थे अभेदसम्बन्धेन, वापदार्थस्य च सादृश्यार्थकादि-पदार्थे स्वनिष्ठप्रतियोगितानिरूपकत्वसम्बन्धेनाऽन्वय इति एकधर्मावच्छिन्नसंसर्गेणाऽन्वयाऽभावेन सहविवक्षाऽसंभवात् कथं द्वन्द्वः ? इति चेन्न, 'आद्यन्तौ टकितौ' इत्यत्र यथा प्रथमतः समुदायावच्छिन्नस्य समुदाया-वच्छिन्नेऽन्वये जाते पुनः यथासङ्ख्यसूत्रद्वारा पृथगन्वयस्तथा प्रकृतेऽपि प्रथमतः भूवौ इति समुदायस्य आदी इति समुदायेऽन्वयः स्वीक्रियते। तत्र सम्बन्धश्च - स्वघटकाभिन्नघटितत्व-स्वघटकनिष्ठ- प्रतियोगितानिरूपकसादृश्यवद्घटितत्व-एतदुभयसम्बन्धेन। तथा हि - स्वम् = भूवासमुदायः, तद्घटकः, भूशब्दः, तदभिन्नः = व्यवस्थार्थक आदिपदार्थः, तद्घटितत्वम् आदीति समुदाये। पुनः, स्वम् = भूवासमुदायः, तद्घटकः = वा इति तन्निष्ठप्रतियोगितानिरूपकसादृश्यवान् = प्रकारार्थक - आदिस्तद्घटितत्वम् आदीति समुदाये। एवञ्च सहविवक्षायाः सत्त्वात् न काप्यनुपपत्तिः द्वन्द्वसमास इति। तथा च - भूप्रभृतयो वासदृशाः ये सन्ति ते च धातुसंज्ञकाः स्युरिति भावः। अत्र वासादृश्यञ्च क्रियावाचकत्वेन स्वीक्रियते। एवञ्च - क्रियावाचित्वे सति भ्वादिगणपठितानुपूर्वीसमानानुपूर्वीकत्वं धातुत्वम् इति सिध्यति। 'सादृश्यम् स्वप्रतियोगितावच्छेदकव्यापकीभूतधर्मेण गृह्यते' इति नियमः। यथा - चन्द्र इव मुखम् इत्यत्र आह्लादकत्वधर्मेण सादृश्यङ्गृह्यते, चन्द्रे यथाऽऽह्लादकत्वम्, तथा मुखेऽपीति (पाण्डेयः, सन् २०१२, पृ. १४०)। आह्लादकत्वञ्च सादृश्यप्रतियोगितावच्छेदकव्यापकीभूतो धर्मः। तथा हि - सादृश्यप्रतियोगितावच्छेदकम् = चन्द्रत्वम्, तन्निष्ठव्याप्यता-निरूपितव्यापकतावत्त्वञ्च आह्लादकत्वे इति। यत्र यत्र चन्द्रत्वम्, तत्र तत्र आह्लादकत्वम् इति व्याप्तिः। व्यापकत्वन्नाम स्वसमाना-धिकरणात्यन्ताभावाऽप्रतियोगित्वम्। स्वम् = चन्द्रत्वम्, तत्समाना-धिकरणात्यन्ताभावः = न आह्लादकत्वाभावः, अपि तु घटत्वा-द्यभावस्तत्प्रतियोगी घटादिस्तदप्रतियोगि = आह्लादकत्वम्, तदप्रति- योगित्वम् आह्लादकत्वे इति आह्लादकत्वं चन्द्रत्वव्यापकमिति सिद्ध्यति। प्रकृते च वासादृश्यं साध्यक्रियावाचित्वेनाभिप्रेतम्। परन्तु साध्यक्रिया-वाचित्वम् न हि सादृश्यप्रतियोगितावच्छेदकीभूतवात्वव्यापकम्। विकल्पार्थके 'वा' इत्यव्यये वात्वस्य सत्त्वेऽपि साध्यक्रियावाचित्वस्य अभावेन स्वसमानाधिकरणात्यन्ताभावाऽप्रतियोगित्वरूपव्यापकत्वस्य दुर्घटत्वात्। तथा हि = स्वम् वात्वम्, तत्समानाधिकरणात्यन्ताभावः = साध्यक्रिया-वाचित्वाभावः (वात्वाधिकरणीभूताव्ययीभूतवाशब्दे वात्वस्य सत्त्वेऽपि साध्यक्रियावाचित्वाऽसम्भवात्) तत्प्रतियोगि एव = साध्यक्रियावाचित्वम्, न तु तदप्रतियोगीति साध्यक्रियावाचित्वस्य सादृश्यप्रतियोगितावच्छेदकी-भूतवात्वनिरूपितव्यापकताश्रयत्वाऽयोगात् न तेन धर्मेण सादृश्यमिति क्रियावाचित्वलाभः कथङ्कारं सेत्स्यतीति जिज्ञासा अत्र जागर्ति। तदोच्यते, अत्र परस्परसाहचर्येण क्रियावाचित्वलाभः क्रियते। तथा हि - वाशब्दो द्विविधः। विकल्पार्थकाव्ययवाशब्दः, गतिगन्धनार्थकवाशब्दश्च। उभावपि वाशब्दावसत्त्ववाचिनौ। एवं भूशब्दोऽपि द्विविधः - पृथ्व्यर्थकः, सत्तार्थकश्च। पृथ्व्यर्थकभूशब्दः सत्त्ववाची, सत्तार्थकश्चासत्त्ववाची। तत्र चासत्त्ववाचिवाशब्दसाहचर्यात् भूशब्दोऽप्यसत्त्ववाच्येव स्वीक्रियते। असत्त्ववाचिभूशब्दश्च साध्यक्रियावाचीति तत्साहचर्यात् वाशब्दोऽपि

साध्यक्रियावाच्येव स्वीक्रियते। एवञ्च साहचर्येण क्रियावाचित्वलाभः। साहचर्यलब्धं क्रियावाचित्वञ्च व्यङ्ग्यमिति व्यञ्जनावृत्तिजन्योपस्थितिविषयत्वात् क्रियावाचित्वस्यापि शाब्दबोधे प्रवेशो भवत्येव। एतेन शाब्दबोधाय क्लिश्यन्तः परास्ताः भवन्ति। नन्वत्र एकेनैवादिपदेन व्यवस्थाप्रकारयोरुपस्थितिः। एकपदोपस्थि-तयोस्तयोः क्रमिकत्वाभावेन यथासङ्ख्यसूत्राप्रसक्तौ भूपदार्थस्य व्यवस्थार्थक-आदिपदार्थे एव तथैव वापदार्थस्य च प्रकारार्थक- आदिपदार्थे एवान्वय इत्यत्र विनिगमनाभावेन कदाचिद्विपरीतान्वयोऽपि स्यात्। किञ्च भूप्रभृतेर्वासदृशेनाभेदोन्वयोऽप्यव्युत्पन्नः, अन्यथा हरिपदोपस्थाप्यनारायणसिंहयोरप्यभेदान्वयापत्तेः, तथा च भूप्रभृतयः धातुसंज्ञकाः भवन्ति, वासदृशाश्च धातुसंज्ञकाः भवन्ति इत्यर्थापत्तौ हिरुगाद्यव्ययानामपि धातुत्वापत्तिरिति चेन्न, भूवादयश्च भूवादयश्चेत्येकशेषेण एकत्रादिशब्दस्य व्यवस्थार्थकत्वेना- परत्र च प्रकारार्थकत्वेनादोषात्। एवञ्च 'भूप्रभृतयो ये वासदृशाः' इत्यर्थलाभान्न काप्यनुपपत्तिः। न च व्यवस्थार्थक-आदिशब्दघटितभूवादिशब्दे वाग्रहणम्, प्रकारार्थक-आदिशब्दघटितभूवादिशब्दे च भूग्रहणं व्यर्थमिति शङ्क्यम्, तयो: परस्परसादृश्यनिर्वाहकत्वेनोपयोगात्। एवमेव एकशेषेणैकपदो-पस्थितभूप्रभृतिवासदृशयोरभेदान्वयबोधनायापि तयोर्ग्रहणं भवत्येव। सरूपाणामेव एकशेषात्सारूप्यसम्पादनायाऽपि तयोर्ग्रहणमिति बोध्यम्।

इत्थञ्च भ्वादयो क्रियावाचकाः धातवः इति फलितम्। अत्र भ्वादय इत्यनेन धातुपाठपठितभूधातुमारभ्य कण्ड्वादिप्रकरणान्ताः धातवो ज्ञेयाः, तत्रापि भ्वादिगणपठितानां शब्दानां स्वरूपबोधकत्वेन क्रियावाचित्वाभावात्, लक्ष्यस्थानाञ्च गणस्थत्वाभावेन धातुत्वानापत्तेश्च भ्वादिगणपठितवृत्त्या-नुपूर्वीसमानानापूर्वीमन्तः क्रियावाचकाः धातुसंज्ञकाः स्युरित्यर्थः। गणेऽपठितानां शिष्टप्रयुक्तानाञ्च धातूनां कार्यानुरूपं तत्तद्गणे पाठं परिकल्प्य धातुसंज्ञा विधेया। अत्र - भूरादिर्येषां ते भूवादयः। मध्ये महाव्याहृतिस्मारकमङ्गल-प्रयोजकवुगागमेन सिध्यति इत्येकः पक्षः। यद्वा, भुवम् = जायमानमर्थं वदन्तीति वदेरौणादिके इनौ भूवादय इति तृतीयः कल्पः। क्रियावाचिनो धातव इत्यर्थः। यद्वा, भवनं भूः, वा आदिर्येषां ते वादयः, वादयश्च वादयश्चेति वादयः। भुवो वादयः भूवादयः। षष्ठ्यर्थो वाच्यवाचकभावः। भुवः = क्रियायाः वाचकाः भूप्रभृतयः वाप्रभृतयः धातवः इत्यर्थः। अत्र साध्यक्रियात्वन्नाम क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्मवत्त्वम्। पचतीत्यादौ किम्? कः? इत्यादिकारविषयिणी आकाङ्क्षा भवति, न क्रियाविषयिणी। 'पाकः' इत्यादौ च क्रियाविषयिण्याकाङ्क्षा इति 'पाकः' इत्यादिर्हि सिद्धा क्रिया। पचतीत्यादिश्च साध्या। अत्र 'क्रियावाचकाः' इत्यकथने भ्वादिगणपठितानुपूर्वीसमानानुपूर्वीमतः धातुत्वप्रसक्तौ यच्छब्दस्त्रीलिङ्गद्वितीयाबहुवचने 'याः' इत्यस्यापि धातुत्वापत्तिः (शास्त्री, सन् १९९४, पृ. ५९)। एवम् वा, नु, दिव् इत्यादिधातुत्वसमानाधिकरण-प्रातिपदिकत्वादिमतामपि धातुत्वापत्तिस्तद्वारणाय क्रियावाचका इति। केवलं क्रियावाचकानामेव धातुत्वे हिरुक्, पृथगि-त्याद्यव्ययानां, शिश्ये इति भावार्थतिङन्तस्य च धातुत्वं स्यात्, तद्वारणाय भ्वादिगणपठितानुपूर्वीसमानानुपूर्वीकत्वमपि वक्तव्यमेवेति दिक्।

## निष्कर्षः

शब्दशास्त्रानुसारं धात्वर्थस्य निरूपणमत्र विहितमस्ति। फलव्यापारयोर्धातुरिति प्रसिद्धमस्ति। फलनिष्ठवाच्यतानिरूपितवाचकतावान् धातुः, तथा च व्यापारनिष्ठवाच्यतानिरूपितवाचकतावान् धातुरिति फलति।

फलव्यापारयोर्मध्ये फलजनकत्वात् व्यापारस्य प्राधान्यमिति। शाब्दिकनये व्यापारमुख्यविशेष्यकशाब्दबोधो जायते। मीमांसकानां मते तु भावनामुख्यविशेष्यकशाब्दबोधो भवति तथैव नैयायिकानां मते तु प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधो भवति। एतेषां सर्वेषां मतानां सम्यगालोडनं विधाय अनुसन्धानमिदं विहितमस्ति। तथा च धातूनां परिचयः, धात्वर्थस्य फलव्यापारयोः परिचयः, धातुसंज्ञाविधायकस्य सूत्रस्य परिचयः, धातुसंज्ञाविधायकस्य सूत्रस्य परिष्कारश्चात्र विहितं वर्तते। धात्वर्थविषयकस्य परमतस्य दृढतरप्रमाणबलेन खण्डनं विधाय शब्दशास्त्रानुसारं स्वसिद्धान्तस्य स्थापनमप्यत्र कृतमस्ति।

## कृतज्ञताज्ञापनम्

अनुसन्धानात्मकेऽस्मिन् कार्ये वैयाकरणभूषणसार–शेखरमनोरमादिग्रन्थानामालोडनं विधाय धात्वर्थस्य निरूपणं तथैव धातुसंज्ञाविधायकस्य सूत्रस्यापि अर्थापनं विहितमस्ति। अत्र च व्याख्यानप्रसङ्गेऽनुसन्धानात्मककार्ये लेखगतप्रविध्यादिविषये च परामर्शदातृभ्यो विद्वद्भ्यो धन्यवादं निवेदयामि। अथ च लेखमिदमाद्यान्तं सूक्ष्मेक्षिकया सम्परीक्ष्य यथावश्यकं परामर्शदातृभ्यो गुरुभ्योऽपि हार्दिकीं कृतज्ञतां व्यनज्मि।

## सन्दर्भग्रन्थसूची

त्रिपाठी, जयशङ्करलालः (२०७०) व्याकरणमहाभाष्यम्, वाराणसीः चौखम्बा–कृष्णदास–अकादमी।

द्विवेदी, ब्रह्मदत्तः (२०४२) वैयाकरणभूषणसारः, वाराणसीः चौखम्बा–पब्लियर्श।

नेने, गोपालप्रसादशास्त्री (२०३७) वैयाकरणभूषणसारः, वाराणसीः चौखम्बा–अमरभारती–प्रकाशनम्।

मिश्रः, आद्यप्रसादः (सन् २०१६) वैयाकरणभूषणसारः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

पाण्डेयः रमाकान्तः (सन् २०१२) प्रौढमनोरमा, चौखम्बासंस्कृतप्रतिष्ठानम्

शर्मा, गिरिधरः (सन् २०१४) वैयाकरणसिद्धान्तकौमुदी, वाराणसीः मोतिलाल–वनारसीदासः।

शास्त्री, अशोकचन्द्रगौडः (२०५५) संस्कृतव्याकरणशास्त्रेतिहासविमर्शः, वाराणसीः भारतीयविद्यासंस्थानम्।

शास्त्री, वैकुण्ठनाथ (सन् १९९४ ) लघुशब्देन्दुशेखर, वाराणसीः चौखम्बा–सुरभारती–प्रकाशनम्।